प्रारम्भाब्दः १९६४ ISSN 23[illegible]7

वर्षम् - ५३ [illegible] ५३

वार्षिकी शोधपत्रिका

२०१६ - २०१७

# सुरभारती



सत्यं शिवं सुन्दरम्

Estd. 1949

पारम्परिकसंस्कृताध्ययनविभागः

बरोडासंस्कृतमहाविद्यालयः

महाराजासयाजिरावविश्वविद्यालयः, वटोदरम्

Scanned with CamScanner

बाह्यविशेषज्ञः
प्रो. विनोदकुमारः झा
प्रो. देवेन्द्रनाथपाण्डेयः

**प्रकाशकः**
सुरभारती,
पारम्परिकसंस्कृताध्ययनविभागः
बरोडा संस्कृतमहाविद्यालयः
महाराजासयाजिरावविश्वविद्यालयः, विक्रमबागः, वटोदरम् - ३९० ००२
दूरभाषः - ०२६५-२७९५५११
surbhartibsm1964@gmail.com

**प्रकाशन वर्षः फरबरी-२०१७**
**प्रतसङ्ख्या - २५०**

---

**मुद्रकः** - जतीन हसमुखराय सोमाणी, मेनेजर, धी महाराजा सयाजिराव युनिवर्सिटी ओफ बरोडा प्रेस, राजमहेल दरवाजा, राजमहेल रोड, वटोदरम् - ३९०००१.

Scanned with CamScanner

## ।। अनुक्रमणिका ।।


| | विषयाः | लेखकाः | पृ.सं. |
|---|---|---|---|
| – | शुभसन्देशः कुलाधिपतिः | राजमाता शुभांगिनीराजे गायकवाड | |
| – | सम्पादकीयम् | प्रो. के. कृष्णन् | |
| | **शोधलेखाः** | | |
| १ | संस्कारः | प्रो. डी. एन. पाण्डेयः | १ |
| २ | महाकविमल्लिनाथविरचिते श्रीरघुवीरचरित-महाकाव्ये वाल्मीकिरामायणस्य प्रभावः | डॉ. सदानन्दत्रिपाठी 'दयालु' | ७ |
| ३ | मुकुलभट्टदिशाऽभिविचारः | डॉ. ललितकुमारः पटेलः | १४ |
| ४ | धर्मे ईश्वरः | डॉ. मीरा दुबे | २१ |
| ५ | संस्कृतेऽनूदितस्य हयत इत्यारबीज्योतिष-ग्रन्थस्य समीक्षा | डॉ. श्यामदेवमिश्रः | ३६ |
| ६ | विकल्पः विवक्षा च | डॉ. दीपेशः विनोदः कतिरा | ४४ |
| ७ | धर्मशास्त्रे स्त्रीसमानतानुषङ्गतया दायभागः स्त्रीधनापरिहार्यता च | डॉ. पंकजः कृ. ठाकरः | ४८ |
| ८ | जीवब्रह्मणोरभिन्नता | डॉ. शत्रघ्नः पाणिग्राही | ५५ |
| ९ | वैदिकसाहित्ये पुराणशास्त्रस्य विमर्शः | डॉ. कपिलदेवः हरेकृष्णः शास्त्री | ६० |
| १० | वैयाकरणानां शब्दतत्त्वम् | डॉ. अखिलेशकुमारः द्विवेदी | ६९ |
| ११ | वैदिकवाङ्मये आत्मनः स्वरूपम् | डॉ. भावप्रकाशः गान्धी | ७४ |
| १२ | वेदे सुवर्णविज्ञानम् | डॉ. गिरिजाप्रसादः षडङ्गी | ८२ |
| १३ | अभिनवगुप्तकृतायाः व्याख्यायाः विमर्शः | डॉ. विष्णुप्रसादः टी. रावलः | ८९ |
| १४ | उत्सवनोन्नतिः | डॉ. प्रफुल्लः पुरोहितः | ९१ |
| १५ | वाग्योगविद् पतञ्जलिः | श्रीविकासः शास्त्री | ९४ |
| १६ | महार्थानां व्याकरणाद्वैयाकरण उच्यते | डॉ. क्षितीश्वरनाथः पाण्डेयः | ९७ |
| १७ | ऋग्वेदे अद्वैततत्त्वम् | श्रीसुरेशः पटेलः | १०१ |
| १८ | सिद्धहेमशब्दानुशासनगततत्त्वानां विमर्शः | डॉ. योगेशः त्रिवेदी | १०५ |
| १९ | श्रीसान्दीपनिस्तोत्रम् एकमध्ययनम् | श्रीराहुलः जोशी | ११० |
| २० | विश्वभाषासु संस्कृतस्य प्रदानम् | डॉ. हरिप्रसादः पाण्डेयः | ११६ |


Scanned with CamScanner

# संस्कारः

–प्रो. डी. एन. पाण्डेयः*

## ★ शब्दव्युत्पत्तिस्तदर्थविवेचनञ्च।

सम्-उपसर्गपूर्वकात् कृञ्- धातोः घञि कृते सति **सम्- पिभ्यां करोतौ भूषणे** तथा च **समवाये च** इति सूत्राभ्यां भूषणार्थे समवाये(समुच्चयार्थे) क्वचिदभूषणेप्यर्थे सुटि कृते सति सुपि **संस्कारः** इति शब्दो निष्पाद्यते। अत्र शब्दे प्रयुक्तानां सर्वेषां प्रत्ययादीनां तद्वदेव महत्त्वमस्ति यथाङ्गापूर्वाणां महत्त्वं मुख्य- यज्ञसम्पादनाय भवति। तात्पर्यमिदमस्ति यत् यदि विशेषरूपेणास्य शब्दस्यार्थविज्ञान-दृष्ट्या विश्लेषणं क्रियते चेदस्य शब्दस्य व्यापको ह्यर्थः प्रस्फुटितो भविष्यति। तथैव **परिष्कारः, संस्कृतिः एधोदकस्योपस्कुरुते** इत्यादीनां शब्दानां निष्पत्तिः उपर्युक्तसूत्राणां साहाय्येन भवति।

तत्र सामान्यतया वयं संस्कार- शब्देन अनुकूलप्रतिकूलाचरणजनितं मानवस्वभावं मन्यामहे। कारणमस्ति यत् केचन शब्दाः संस्कृत-साहित्ये इयद्व्यापकाः शोश्रूयन्ते लौकिकव्यवहारक्षेत्रे येषामियत्ता नियतार्थावस्थितिर्नावकलयितुं शक्यते, यथा **विडम्बना, प्रपञ्चः, संस्कार** इत्यादयः। इमे शब्दाः प्रायशः प्राकरणिकान् अर्थान् प्रकाशयन्तः बहुभिः विषयैरन्विताः दृश्यन्ते। शब्दाः प्रायशः रूढार्थे यौगिकार्थे योगरूढार्थयोश्चेति त्रिष्वर्थेषु प्रवृत्ताः दृश्यन्ते येनार्थवैभिन्यं तेषां कल्प्यते। एतत्सर्वमवकलय्य एव संस्कृतसाहित्ये धातूनामनेकार्थत्वमपि प्राकरणिकं प्रवृत्तं दृश्यते। एतदतिरिच्य वाचक-लक्षक-व्यञ्जक-शब्दशक्तिप्रवाहेषु प्रवृत्ताः सन्तः प्रयोगदृष्टिमावर्जयन्ति विदुषाम्।

अत्र उपर्युक्तव्याकरणसूत्रलक्षितार्थेषु प्रवृत्तस्य संस्कार-शब्दस्य शास्त्रमर्यादायाम् तात्पर्यं चिन्त्यते- यत्कारणाद् भवति व्यापकोयं शब्दः।

सामान्यरूपेण यावदहमवकलयामि, सम्-इत्युपर्गः संस्कारशब्दे साधुभावमादधाति कृ-धातोस्तु **क्रियासामान्यमुपकल्पयति। तयोर्मध्ये सौन्दर्यं** गुणं वा स्थापयितुं प्रवर्तते सुटः-स् इति। अतः अर्थोयं भवति यत् साधुप्रवृत्तिर्यस्मिन्विधौ भवति जीवस्य विशेषरूपेण मानवस्य तद्विधिरुच्यते- संस्कारः। अयं तावत् सामान्योर्थो भवति प्रवृत्तिनिमित्तं संस्कार इति शब्दस्य। यद्यपि संस्कारशब्दस्य प्रवृत्तिनिमित्तानि बहूनि सन्ति संस्कृतसाहित्ये तथापि

* प्रोफेसर, वेद-वेदान्तविभागः, श्रीसोमनाथ-संस्कृतयुनिवर्सिटी-वेरावलम् (गुज.)



Scanned with CamScanner

**वैशेष्यात्तद्वादस्तद्वादः** इति वचनात् संस्कारस्य प्रवृत्तिनिमित्तेष्वेकसूत्रतां ख्यापनात्पूर्वं यस्मिन्-यस्मिन् अर्थे संस्कार-शब्दस्य प्रयोगो दृश्यते इत्यत्र प्रथमं विचार्यते–

**(१) प्रोक्षणादियाज्ञिकक्रियायां संस्कारः–**

वैदिकधर्मस्याधारभूतेषु श्रौतस्मार्तयज्ञेषु तत्प्रकारेषु इष्टि-पशु-सोमसंस्थासु गृह्ययज्ञरूपेष्वद्यतनीयेषु धार्मिकोत्सवेषु याः द्रव्यादीनां प्रोक्षणादयः सामान्यक्रियाः दृश्यन्ते ते संस्काराः उच्यन्ते। यथा- उक्तं **प्रोक्षणादिजन्यसंस्कारो यज्ञाङ्गपुरोडाशेष्विति** द्रव्यधर्मः- उदा–

**व्रीहीन्प्रोक्षति–** अत्रैतदवश्यमेव चिन्त्यमस्ति यन्न तत्प्रोक्षणं व्रीहिद्रव्यस्वरूपार्थं प्रत्युत प्रोक्षणजनितापूर्वोत्पत्त्यर्थम्। तच्च तनैव साध्यम्।

**(२) शब्दधर्मरूपः संस्कारः–**

**संस्कार-शब्दः** स्वरादिसहितपदवाक्योच्चारणार्थेपि मन्यते। उक्तं यथा प्रातिशाख्ये- **स्याद्वाम्नायधर्मित्वाच्छन्दसिनियमः** इति। **स्वरसंस्कारयोश्छन्दसिनियमः** इति च। स्वराः उदात्तानुदात्तस्वरितप्रचयाः, संस्काराश्च पुनः (व्याकरणविषयाः) लोपागमवर्णविकाररूपाः। तज्ज्ञानाभावे दोषापत्तिस्स्यात्। तथा च करणेर्थे अच् प्रत्यये कृते सति **स्वर्यन्ते अर्थाः एभिरिति स्वराः यद्व्युत्पाद्यते** वेदार्थकरणाय तस्यापलापः स्यात्।

**तत्कारणाच्च पुनः समाम्नाय समाम्नातः स व्यख्यातव्य** इति नैरुक्तप्रक्रियायाः वैदिकशब्दनिर्वचनं सिद्धं न स्यात्, तस्मात् संस्कारशब्दोत्र वैदिकलौकिकव्याकरणप्रक्रियामपि स्मारयतीत्यस्त्यस्यगौरवम्। अस्मिन्नेव सन्दर्भे उक्तम्–

**संस्कारवत्येव गिरामनीषि तया च पूतश्च विभूषितश्च।**[1]

**(३) दार्शनिक-सन्दर्भे संस्कारशब्दः–**

न्यायवैशेषिक-दर्शने संस्कारः गुणश्चतुर्विंशतिगुणेष्वन्यतमगुणरूपेण स्थितः यथा- **रूपरसगन्धस्पर्शसङ्ख्यापरिणामपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धि-सुखदुःखेच्छाद्वेषधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः।**

संस्कारः त्रिविधः वेगोभावनास्थितिस्थापकश्चेति। वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः। अनुभवजन्या स्मृतिर्हेतुर्भावनात्मवृत्तिः। अन्यथा कृतस्य पुनस्तदवस्थापादनं स्थितिस्थापकः। तथा चोक्तम्– गुणः कृतात्मसंस्कारः प्रधानायोपकल्पते। प्रधानस्योपकारे हि तथा भूयांसि वर्तते। योगदर्शने च विरामप्रत्ययाभ्यासपर्वः संस्कारशेषोन्यः, संस्कारशेषो निरोधः इति।

Scanned with CamScanner

(४) शरीरात्मशुद्धौ विद्याग्रहणे च संस्कारः—

वेदान्तदर्शनसन्दर्भे यथा– **'स्नानाचमनादिजन्याः संस्कारा: देहे उत्पद्यमानानि तदभिधानानि जीवे कल्प्यन्ते'**[२] रघुवंशे च – **'प्रयुक्तसंस्कार इवाधिकं बभौ'**[३]

**(५) धर्मरूपे संस्कारः—**

वेदार्थो हि धर्मो भवति। तस्य च यज्ञादिरूपत्वात्। उक्तञ्च– **यागादिरेव धर्मः,** आदि-पदेनेष्टापूर्तयोर्ग्रहणमिति ज्ञेयम्। अयमेवधर्मः प्रयोगरूपो भवन् संस्कारप्रकारेषु विकसितो यदा भवति तदा शारीरिकमानसिकसंस्काररूपेषु विवाहादिसंस्कारेषु जातित्वेनावलोक्यते। उक्तं यथा–

**(१) वैदिकैः कर्मभिः पुण्यैः निषेकादिद्विजन्मनाम्।**
**कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च।।**[४]

**(२) चित्रकर्म यथानकैः रंगैः सम्मील्यते तथा।**
**ब्राह्मण्यमपितद्वत्स्यात् संस्कारैर्विधिपूर्वकैः।।**

**(३) गार्भैर्होमैः जातकर्मचूडामौञ्जीनिबन्धनैः।**
**बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते।।**

अत्र शरीरमलोपशमनाय संस्काराणां वैशिष्ट्यं प्रतिपादितमस्ति। शरीरसंस्कारस्य तात्पर्यमिदमस्ति यत् भारतीयसंस्कृतौ पुरुषार्थचतुष्टयस्य प्राधान्यमवलोक्यते। तस्मात्कारणात् सर्वेषां मानवानां भारतीयसंस्कृतिदृष्ट्या भौतिकादीनि त्रिविधानि जीवनानि मन्यन्ते। तस्मात्कारणात् अस्माकं संस्कारकल्पनायामेतेषां सर्वेषां त्रिविधानां मानवजीवनानाम् आचारव्यवस्था परिकल्पिता दृश्यते। अस्मादेवकारणात् भारतीयदर्शनेषु तत्त्वचिन्तनेन सहाचारसंस्कारचिन्तनस्यापि निर्देशोवलोक्यते। क्रियाशुद्धिमाध्यमेनैव शरीरशुद्धिर्भवति शुद्धे शरीरे च विशुद्धा प्रज्ञा तिष्ठति। अत एवाह वेदान्तसारे- एतेषां नित्यादीनां बुद्धिशुद्धिपरमं प्रयोजनम् इति। तथा चाहान्यत्र क्वचित्–न हि कर्मभिरेवकेवलैः ब्रह्मप्राप्तिः, प्रज्ञानकर्मस-मुच्चयात्। एतैस्तु संस्कृत-आत्मनोपासनास्वधिक्रियते। यथैकेन आङ्लसाहित्यकारेणोक्तम्-

***"A beautiful body is fitting raiment of a beautiful soul"***

अत्र प्रश्नोयमुदेति यदेतेषु पूर्वोक्तेष्वर्थेषु विद्यमानोऽपि संस्कारशब्दः तत्र भारतीयसंस्कृतेरङ्गभूतः एकादशप्रभृतिरष्टचत्वारिंशत्–संख्यापरिमितेषु मानवजीवनसंस्कारेषु

२. (वाचस्पत्याम्।) ३. रघु.-३.१८ ४. द्र.संस्कारसारः, मनु. पृ.५६/५७

संस्कारशब्दः कथं प्रवृत्तो मन्यते इति? चेत् व्याकरणशास्त्रीयार्थावगमनप्रक्रियया इति वाच्यम्। अर्थात् आचार्यपतञ्जलेः **सिद्धे शब्दार्थसम्बन्धे** इत्यनुशासनात् 'व्यख्यानतो विशेषप्रतिपत्तिर्न सन्देहादलक्षण'मिति चानुशासनात् प्राकरणिकेर्थे षोडशादिसंस्कारेषु सिद्धः रूढो वा मन्यते।

**सर्वेषु संस्कारपदप्रवृत्तिनिमित्तेषु सामान्यधर्मतावलोकनम्–**

यद्यपि संस्कार-पदेन बहवो ह्यर्था पूर्वं वर्णितास्तथापि सम्यक् परिशीलनेन सर्वत्रैव सामान्यो गुणः धर्मो वा अवलोक्यते। तच्च पुनः तस्य संस्कारशब्दस्य व्युत्पत्तेरवगम्यते। व्युत्पत्तौ **सम्-सुट्-कृ-घञ्** इत्यत्र सम् इति उपसर्गः शोभाधायकतत्त्वं संस्कारशब्दे सूचयति सुट् च पुनः तच्छोभाधायकं तत्त्वं विशेषरूपेणोद्भावयति। कृ-धातुस्तु क्रियावयापारम् इङ्गयति। घञश्च पुनः सिद्धावस्थां तत्र शब्दे योजयति। अतः भवतु नाम स भू-संस्कारः, शब्दसंस्कारः, यज्ञकर्मसंस्कारः जीवनसंस्कारो वा तत्र सर्वत्रैवैतानि सकारत्मकानि तत्त्वानि सन्निहितानि भवन्ति। तस्मात् सामान्यरूपेण संस्कारस्य संस्कारत्वमुपकल्पितं भवति। विशेषरूपेण तु **'व्याख्यनतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षण'**मित्यनुशासना-धारेणावगन्तुं शक्यते। तदनुसारञ्च जीवनप्रबन्धनसन्दर्भे संस्कारणां स्वारस्य भारतीयां संस्कृतिं च विश्ववारां विधत्ते। अस्यैव पुष्टिर्भवति विन्टरनित्ज महोदयस्य संस्कारविषयक-विचारावलोकनेनापि यथा—

***"The rules for all customs, ceremonies and sacrifices through which the life of an indian starting with the moment when he is receved in his mother's womb up to the hour of his death and even beyond this by means of the funeral rites and the soul cult, receives a higher initiation which the indians call sanskar.***

***They are so much the more important as, according to discoveries made long ago, numerous parallels are found in the manners and customs of the Indo-Germanic folks to those described in the Grihya-Sutras."***

अनेन प्रकारेण संस्कारेषु यदस्ति नित्यं सूत्रं तन्माध्यमेनैवाद्य भारतस्य प्राचीनः सम्बन्धः जर्मनीदेशेन इरान-देशेन च तथा वेदस्यापि क्वचिदवेस्तासाहित्येन च स्थाप्यते विश्वविचारकैः येन वेदस्य **माता भूमिः, पुत्रोऽहं पृथिव्याः** इति सूक्तेः सार्वकालिकत्त्वं लोकोपकारिकत्वञ्च रिध्यति।

Scanned with CamScanner

★ **संस्काराणां भाविकारानुसारं विभागः**

यथा वयं जानीमो यत् अस्माकं संस्कृतवाङ्मये विशेषरूपेण निरुक्ते सर्वेषां पदार्थानां विशेषतया मानवजीवनस्य क्वचित् षड्भावविकाराः क्वचिच्च ततो न्यूनाः क्वचित्पुनः अधिकाः भावविकाराः प्रोक्ताः सन्ति। मन्ये तस्यैव प्रभाववशात् शेक्सपीयर-कविरपि पाश्चात्यदेशस्य सप्तविधामवस्थामनुते जीवनस्य। द्र. **All the world's a stage.** अतः इमे अस्माकं संस्कृतौ ये संस्काराः सन्ति ते मानवजीवनं त्रिषु विभागेषु विभज्य तदर्थं व्यवस्था विदधति, तदित्थमस्ति– (१) जन्मनः पूर्वावस्था तस्याश्च संस्कारः सीमन्तोन्नयनादयः (२) जन्मनः पश्चाद्वर्तिनः संस्काराः जातकर्म इत्यादयः। (३) शरीरावसानान्तसंस्काराः श्राद्धादयः।

इदानीं संस्काराणां प्रकाराः प्रस्तूयन्ते–

यद्यपि संस्कारविभाजनप्रकरणे तेषाञ्चानुष्ठानविषये बहूनि मतानि शास्त्रेष्ववलोक्यन्ते तथापि लोकप्रसिद्धाः ये षोडशसंस्काराः सन्ति ते खलु व्यासस्मृतेरनुसारमस्ति। यथा–

**(१)** गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामक्रिया-निष्क्रमण-अन्नप्राशन-वपनक्रिया-कर्णवेध-व्रतादेश-वेदारम्भ-केशान्त-स्नान-उद्वाह-विवाहाग्निपरिग्रह-त्रेताग्नि-संग्रहश्चेति।

**(२) आश्वलायनः-**विवाह-गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-चूडाकर्म-अन्नप्राशन-उपनयन-समावर्तन-अन्त्येष्टयः।

**(३) पारस्करः-** विवाह-गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-निष्क्रमण-अन्नप्राशन-चूडाकर्म-उपनयन-केशान्तसमावर्तन-अन्त्येष्टीति त्रयोदशसंस्काराः सन्तीति मनुते।

**(४) बौधायनः-** विवाह-गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-**उपनिष्क्रमण**-अन्नप्राशन-चूडाकर्म-कर्णवेध(गृह्यशेष)-उपनयन-समावर्तन-पितृमेधेति त्रयोदश-संस्कारान् मनुते।

**(५) वाराह-गृह्यसूत्रम्-** जातकर्म-नामकरण-दन्तोद्गमन-अन्नप्रशन-चूडाकर्म-उपनयन-वेदव्रत-गोदान-समावर्तन-विवाह-गर्भाधान-पुंसवनसीमन्तोन्नयन इति त्रयोदश-संस्कारान् स्वीकरोति।

**(६) वैखानस-गृह्यसूत्रम्-** ऋतुसंगमन-गर्भाधान-सीमन्त-विष्णुबलि-जातकर्म-उत्थान-नामकरण-अन्नप्राशन-प्रवसागमन-पिण्डवर्धन-चौलक-उपनयन-पारायण-



Scanned with CamScanner

व्रतबन्धविसर्ग-उपाकर्म-उत्सर्जन-समावर्तन-पाणिग्रहण-इत्यष्टादशसंस्कारान् विवृणोति।

**(७) गौतम-धर्मसूत्रम्-** गर्भाधान-पुंसवनसीमन्तोन्नयन-जातकर्म-नामकरण-अन्नप्राशन-चौल-उपनयन-चत्वारि वेदव्रतानि-स्नान-सहधर्मचारिणिसंयोग-पञ्चमहायज्ञ-अष्टक-पर्वणश्राद्ध-अग्न्याधेय-अग्निहोत्र-श्रावणी-आग्रहाणी-चैत्री-दर्शपूर्णमास-चातुर्मास्य-आश्वयुजीतिसप्तपाकयज्ञ-निरूढपशुबन्ध-सौत्रामणि इति संस्था सप्तहविर्यज्ञाः इति चत्वारिंशत्-संस्कारा इति प्रतिपादयति।

**(८) गौतमस्मृतिः–** चत्वारिंशत् संस्कारान् मनुते। अङ्गिरा च पञ्चविंशतिः संस्कारान् स्वीकरोति। एतेषां संस्काराणां विधयः तत्तच्छास्त्रालोके वर्णिताः सन्ति। इति शम्।।

✦✦✦✦✦✦✦✦✦✦✦✦

Scanned with CamScanner